राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः) लखनऊपरिसरः

न्यायबिन्दुप्रकरणग्रन्थस्य तृतीयपरिच्छेदः

शास्त्रितृतीयवर्षम्

पञ्चमपत्रम्

बौद्धदर्शनम्

षष्ठः सत्रार्द्धः


प्रेषिका–

डा.कृष्णा कुमारी

अतिथि–प्राध्यापिका

# न्यायबिन्दुप्रकरणग्रन्थस्य तृतीयपरिच्छेदसम्बन्धितानि प्रश्नोत्तराणि

1. **न्यायबिन्दुप्रकरणग्रन्थकारः कः?**
**उ.** आचार्यधर्मकीर्तिः।

2. **सम्यग्ज्ञानं किम्?**
उ. अविसंवादिज्ञानं सम्यग्ज्ञानम्।

3. **न्यायबिन्दुग्रन्थे कति परिच्छेदाः सन्ति? के च ते?**
उ. न्यायबिन्दुग्रन्थे त्रयः परिच्छेदाः सन्ति। ते च– प्रत्यक्षपरिच्छेदः, स्वार्थानुमानपरिच्छेदः, परार्थानुमानपरिच्छेदश्चेति।

4. **प्रत्यक्षस्य विषयः कः?**
उ. स्वलक्षणम्।

5. **स्वलक्षणं कस्य विषयः?**
उ. प्रत्यक्षस्य।

6. **अनुमानस्य विषयः कः?**
उ. अनुमानस्य विषयः सामान्यलक्षणम्।

7. **सामान्यलक्षणं कस्य विषयः?**
उ. अनुमानस्य विषयः।

8. **बौद्धन्यायस्य जनकः कः?**
उ. बौद्धन्यायस्य जनकः आचार्यदिङ्नागः।

9. **अनुमानस्य किं लक्षणम्?**
उ. लिङ्गादर्थदर्शनम्।

10. **अनुमानस्य व्युत्पत्तिः का?**
उ. मीयतेऽर्थोऽनेनेति मानम्। 'अनु' पश्चादर्थे।

11. **अनुमानस्य भेदद्वयं किम्?**
**उ.** स्वार्थानुमानं परार्थानुमानञ्चेति।

12. **परार्थानुमानस्य लक्षणं लिखत?**
उ. त्रिरूपलिङ्गाख्यानं परार्थमनुमानम्।

13. **प्रमाणशब्दस्य निर्वचनं लिखत।**
उ. प्रमीयतेऽर्थोऽनेनेति प्रमाणम्।

14. **परार्थानुमानस्य भेदद्वयं लिखत।**
उ. साधर्म्यवद्वैधर्म्यवच्चेति।

15. **तृतीयपरिच्छेदस्य कः प्रतिपाद्यविषयः?**

उ. परार्थानुमानम्।

**16. प्रत्यक्षं कतिविधम्?**

उ. चतुर्विधं प्रत्यक्षम्।

**17. 'परार्थानुमानं ज्ञानात्मकं' कथनमिदं सत्यमसत्यं वा?**

उ. असत्यम्।

**18. 'बौद्धनैयायिकाः प्रमाणविषये व्यवस्थावादिनः' कथनमिदं सत्यमसत्यं वा?**

उ. सत्यम्।

**19. 'नित्यो शब्दः' इति बौद्धनैयायिकाः स्वीकुर्वन्ति न वा?**

उ. न स्वीकुर्वन्ति।

**20. बौद्धनैयायिकाः स्वसंवेदनं स्वीकुर्वन्ति न वा?**

**उ.** स्वीकुर्वन्ति।

**21. प्रमाणवार्तिकस्य रचनाकारः दिङ्नागो धर्मकीर्तिः वा?**

उ. धर्मकीर्तिः।

**22. सौगतनैयायिका: कति प्रमाणानि स्वीकुर्वन्ति?**

उ. सौगतनैयायिकाः प्रमाणद्वयं स्वीकुर्वन्ति।

**23. संशयस्य अविसंवादकत्वं भवति वा न?**

**उ.** न।

**24. साधनाभास: क:?**

उ. त्रिरूपलिङ्गाख्यानं परार्थानुममित्युक्तम्। तत्र त्रयाणां रूपाणामेकस्यापि रूपस्यानुक्तौ साधनाभासः।

**25. नैयायिका: कति प्रमाणानि स्वीकुर्वन्ति?**

उ. नैयायिकाः चत्वारि प्रमाणानि स्वीकुर्वन्ति। (प्रत्यक्षमनुमानमुपमानं शाब्दं चेति)

**26. पदार्थानां द्विविधः विरोधः लिखत।**

उ. 1. अविकलकारणस्य भवतोऽन्यभावेऽभावाद् विरोधगतिः।
2. परस्परपरिहारस्थितलक्षणतया वा भावाभाववत्।

**27. 'अग्निरत्र धूमात्' इत्यनुमाने क: साध्य:, क: पक्ष: किं च लिङ्गम्?**

उ. अग्निः साध्यः, अत्र पक्षः, धूमात् लिङ्गमिति।

**28. जात्युत्तराणि कानि?**

उ. अभूतदोषोद्भावनानि जात्युत्तराणीति।

**29. 'तद् द्विविधं प्रयोग भेदात्' इत्यत्र 'तत्' इत्यस्य पदस्य कोऽर्थः?**

उ. परार्थानुमानमित्यर्थः।

**30. 'वृक्षोऽयं शिंशपात्वात्' इत्यनुमाने कः साध्यः, कः पक्षः किं च लिङ्गम्?**

उ. वृक्षः साध्यः, अयं पक्षः, शिंशपात्वात् लिङ्गमिति।

**31. कति रूपहेतुरुक्तः?**

उ. त्रिरूपहेतुरुक्तः।

**32. कार्यहेतोः प्रयोगस्य उदाहरणमेकं लिखत।**

उ. वह्निरत्र धूमात्।

**33. कति पक्षाभासाः? के च ते?**

उ. चत्वारः पक्षाभासाः। ते च– प्रत्यक्षम्, अनुमानम्, प्रतीतिः, स्ववचनञ्चेति।

**34. किं नाम दूषणम्?**

उ. दूषणा न्यूनताद्युक्तिः।

**35. के जातयः?**

उ. दूषणाभासास्तु जातयः।

**36. मेयद्वयं किम् ?**

उ. स्वलक्षणं सामान्यलक्षणं चेति।

**37. स्वभावहेतोः प्रयोगस्य उदाहरणमेकं लिखत।**

उ. वृक्षोऽयं शिंशपात्वात्।

**38. 'बौद्धनैयायिकाः प्रमाणविषये सम्प्लववादिनः' कथनमिदं सत्यमसत्यं वा?**

उ. असत्यम्।

**39. सपक्षः कः?**

उ. समानो पक्षः सपक्षः।

**40. 'शब्दात्मकं परार्थानुमानम्' कथनमिदं सत्यमसत्यं वा?**

उ. सत्यम्।

**41. प्रमाणसमुच्चयस्य रचनाकारः दिङ्नागो धर्मकीर्तिः वा ।**

उ. आचार्यः दिङ्नागः।

**42. साध्यसाधनयोः भेदे कः हेतुः भवति?**

43. साधनम्।

**44. ......................तद् व्युत्पाद्यते। इति सूत्रं पूरणीयम्।**

उ. सम्यग्ज्ञानपूर्विका सर्वपुरुषार्थसिद्धिरिति तद् व्यत्पाद्यते।

**45. साधर्म्यस्य निर्वचनं किम्?**

उ. समानो धर्मोऽस्य सोऽयं सधर्मा। तस्य भावः साधर्म्यम्।

**46. वैधर्म्यस्य व्युत्पत्तिः का?**

उ. विसदृशो धर्मोऽस्य विधर्मा। विधर्मणो भावो वैधर्म्यम्।

**47. साधर्म्यस्य लक्षणं किम्?**

उ. दृष्टान्तधर्मिणा सह साध्यधर्मिणः सादृश्यं हेतुकृतं साधर्म्यमुच्यते।

48. **वैधर्म्यस्य लक्षणं किम्?**

उ. दृष्टान्तधर्मिणा सह साध्यधर्मिणः असादृश्यं च हेतुकृतं वैधर्म्यमुच्यते।

49. सन्दिग्धं किम्?

उ. सर्वज्ञ वीतरागयोर्विप्रकर्षाद् वचनादेस्तत्र सत्त्वम् असत्त्वं वा सन्धिग्धम्।

50. साध्यं किम्?

उ. इष्ट इति यत्रार्थ विवादेन साधनमुपन्यस्तं तस्य सिद्धिमिच्छता सोऽनुक्तोऽपि वचनेन साध्यः।